ॐ

हरिः सर्वोत्तमः ! श्रीलक्ष्मीवेङ्कटेशः प्रसन्नः वायुः जीवोत्तमः !



# सागि्निजित्–सर्वपृष्ट–आप्तोर्याम(गरुडचयन)–महायाग–वैभव–पत्रिका

ॐ य इज्यते विधीशानशक्रपूर्वैस्सदा मखैः ।
रमाप्रणयिने तस्मै सर्वयज्ञभुजे नमः ॥
– जगद्गुरुः श्रीमन्मध्वाचार्यः (कर्मनिर्णये)

" यज्ञो वै विष्णुः,
यज्ञो हि श्रेष्ठतमं कर्म ! "

आस्तिकमहाजनेभ्यः एकं विज्ञापनम्

अखिलाण्डकोटिब्रह्माण्डनायकस्य, समस्तकल्याणगुणसम्पूर्णस्य आनन्दस्वरूपस्य दोषरहितस्य अखिलवेदप्रतिपाद्यस्य सर्वसद्रागमेनैव ज्ञेयस्य यज्ञनामकस्य अग्निहोत्रादिसमस्तयज्ञयागहोमैः पूज्यमानस्य यज्ञवराहरूपस्य लक्ष्मीनारायणस्य अनेक–अवतारद्वारा सकलजीवराशीनां कृते यथाप्रार्थनम् ऐश्वर्य–ज्ञान–सम्पदादि–सकलपुरुषार्थान् दत्वा रक्षतः सर्वेश्वरस्य परमानुग्रहेण श्रीहरि–वायु–गुरूणां कृपाकटाक्षेण, अखिलमठाधिपतीनां पूर्णानुग्रहेण, द्वैतसिद्धान्त–प्रतिष्ठापक–जगद्गुरु–श्रीमन् –मध्वाचार्य–मूल–महासंस्थान–परम्परा–आगत–श्री–श्री–राघवेन्द्रस्वामिनाम् अनुग्रहेण श्रीश्री–१००८–श्रीसुबुधेन्द्रतीर्थ –श्रीपादानां परमानुग्रहेण, जगद्गुरु–श्रीमन्मध्वाचार्य–मूलमहासंस्थान–श्रीपादराजमठपीठाधिपतीनां श्रीश्री–१००८– केशवनिधितीर्थ–श्रीपादानां तथा श्रीश्री–१००८–श्रीसुजयनिधितीर्थ–श्रीपादानां च अनुग्रहेण, वेदधर्मपरिपालक–मूलाम्नाय –सर्वज्ञपीठ–जगद्गुरु–श्री–श्री–काञ्ची–कामकोटि–पीठाधीश्वर–श्रीशङ्करविजयेन्द्रसरस्वतीस्वामिनाम् अनुग्रहेण च बहुवर्षेभ्यः अनेकशिष्यान् गुरुकुलवासक्रमेण ऋग्वेदम् अध्यापितवतः सोमयाग–वाजपेयादि–अनेक–महाक्रतुयाजिनः नित्याग्निहोत्रिणः यशोरूपित्वेन भासितस्य श्री.पद्मनाभाचार् इत्यस्य कुमारः, मम जनकः नित्याग्निहोत्री सोमयाजी वाजपेयी मन्त्रालय–विद्यापीठस्य निवृत्तः ऋग्वेदाध्यापकः श्री रामाकृष्णाचार् सधर्मपत्नीकः यजमानः सन् अनुष्ठास्यति यत् सागि्निजित्–सर्वपृष्ट–आप्तोर्याम(गरुडचयन)महायागः इति वैभवम् ।

भविष्यति स्वस्ति–श्री–शुभकृत्–नाम–संवत्सरे उत्तरायणे चैत्रमासस्य कृष्णचतुर्दशीतः(शुक्रवासरतः) वैशाखमासस्य शुक्लनवमीपर्यन्तं(मङ्गलवासरपर्यन्तम्) (सामान्य–अब्दः २९.०४.२०२२ – १०.०५.२०२२) अवभृतस्नानसहितं पूर्तिं गमिष्यत् सागि्निजित्–सर्वपृष्ट–आप्तोर्यामं (गरुडचयनमहायागः) इत्याख्यं वैभवं कर्णाटकराज्ये कोलार्–जनपदे मुलुभागलु–नरसिंहतीर्थस्य तथा श्रीश्रीपादराजमठस्य च अतीव निकटे वर्तमाने श्रीरङ्गविठ्ठलसभाङ्गणे प्रवर्तिष्यते इत्यतः तत्रभवन्तः सकुटुम्बं समागत्य गरुडचयनमहायाग–वैभवस्य दर्शनं कृत्वा सकलक्षेमलाभान् प्राप्य श्रीश्रीयज्ञपुरुषस्य भगवतः अनुग्रहस्य पात्रीभवन्तु इति तथा अस्मै गरुडचयनमहायाग–वैभवाय यथाशक्ति सत्कैङ्कर्यं च कृत्वा अस्य महायागवैभवे पुण्यभागान् अनुभवन्तु च इति प्रार्थयामः

तथा प्रार्थयन्तः

रामकृष्णाचार् – पद्मावती रामकृष्णाचार्
नित्याग्निहोत्री,सोमयाजी, वाजपेयी,
अध्यापकः, श्रीहरिवायुगुरुविद्यापीठम्,
२/२६–ए,नञ्जै पुगळूर् अग्रहारम्, पुगळूर् पोस्ट्,
करूर् – ६३९११३. दूरवाणी – ९७९१६२७९२२

नित्याग्निहोत्री,सोमयाजी, ऋग्वेद–अध्यापकः,
दामोदराचार्, सत्यवती दामोदराचार्, ईरोड्.

इत्थम्
गुरुप्राणेशः, ऋग्वेदघनपाठी,
(दूरवाणी – ९०४२८९२३८९)
चन्द्रिका–गुरुप्राणेशः,बालः अप्रमेयः,
चेन्नै

इमं महायागं सर्वसाधकत्वेन प्रवर्तयिष्यन्ति गरुडचयनादीन्
बहुयागान् प्रवर्तितवन्तः श्रौतिनः

**गोकर्ण–श्री–नागानन्द–पुराणिकः**

तद्गणीयाश्च

## यागे विशेषतया विराजमानाः

वेदनाथश्रौतिनः, रमणशर्मा, जनार्दनश्रौतिनः,तथा 'ईरोड्'–दामोदर–आचार्, 'कोयम्पुत्तूर्'–श्रीनिवास–आचार्, 'कोयम्पुत्तूर्'–सुब्रह्मण्य–ऐयर्, पुनश्च सिरुगमणि–ईरोड्–मन्त्रालय–विद्यार्थिनः सर्वे

# साग्निजित्-सर्वपृष्ट-आप्तोर्याम(गरुडचयन)-महायाग-वैभव-पत्रिका

## गरुडचयनमहायागकार्यक्रमाः

| दिनम् | समयः | विषयः |
|---|---|---|
| प्रथमदिनम् शुक्रवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | गणपतिहवनम्, पुण्याहवाचनम्, उदकशान्तिः, प्रतिसारबन्धः, यागसङ्कल्पः, ऋत्विग्वरणा, मधुपर्कः, उखा सम्भरणा, वायव्यः पशुयागः |
| द्वितीयदिनम् शनिवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | सौमिकाशालाप्रवेशः, प्रवर्ग्यसम्भरणम्, अप्सुदीक्षा, दीक्षायन-इष्टिः, उखाग्निजननम्, विष्णुक्रमः, वत्सरूपस्थानम्, अग्निचयनसङ्कल्पः, देवयज्ञ-अध्यवसनवेदिमानः, अग्निमानः च |
| तृतीयदिनम् रविवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | गार्हपत्याचित्, इष्टगोपदानम्, प्रायणीय-इष्टिः, सोम-क्रपा-आदित्य-इष्टिः,पूर्वाह्णः प्रवर्ग्योपसत् प्रथमा चितिः इष्टगोपदानम्, अपराह्ण-प्रवर्ग्य-उपसत् |
| चतुर्थदिनम् सोमवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | पूर्वाह्णप्रवर्ग्योपसत् द्वितीयचितिः इष्टगोपदानम्, अपराह्ण-प्रवर्ग्य-उपसत् |
| पञ्चमं दिनम् मङ्गलवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | पूर्वाह्णप्रवर्ग्योपसत् तृतीयचितिः इष्टगोपदानम्, अपराह्ण-प्रवर्ग्य-उपसत् |
| षष्ठदिनम् बुधवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | पूर्वाह्णप्रवर्ग्योपसत् चतुर्थी चितिः इष्टगोपदानम्, अपराह्ण-प्रवर्ग्य-उपसत् |
| सप्तमं दिनम् गुरुवासरः | प्रातः ८.०० वादनात् सायं ६.०० वादनपर्यन्तम् | पूर्वाह्णप्रवर्ग्योपसत् पञ्चमी चितिः इष्टगोपदानम्,हिरण्यप्रोक्षण-उपसत्, अलङ्ख्याता |
| अष्टमं दिनम् शुक्रवासरः | प्रातः ८.०० वादनात् रात्रौ ९.०० वादनपर्यन्तम् | पूर्वाह्णप्रवर्ग्योपसत् पञ्चगृहीत-व्याकरादिकर्म, अपराह्ण-प्रवर्ग्य-उपसत्, प्रवर्ग्य-उद्वासना, अग्निप्रायणादिकर्म, वैश्वानरमरुद्यागः, वसोर्धारादिकर्म, स्तोनिर्माणादि, अग्निषोमः प्राणयना, पुशुयूपादिवपः, होमान्तकर्म, वसतिवारिपरिग्रहणा, देवसुवाहविः, अग्निषोमः, पुरोडाशयागः, अग्निषोमपशुयागः, सवनत्रया, क्रतुसङ्कल्पः |
| नवमं दिनम् शनिवासरः | उषसि २.०० वादनात् रात्रौ ९.०० वादनपर्यन्तम् | प्रातःस्तवन-उपक्रमः, बहिर्पवमाना, होमाभिषवा, वपायागः, सताः प्रवेशादिः रूतुयागान्तकर्म, पञ्चस्तोत्रशास्त्रविशिष्टप्रातःस्तवना, माध्यन्दिनसवनोपक्रमः, अभिषवादिदक्षिणदानान्तकर्म, यजमान-अभिषेकः, पञ्चस्तोत्रविशिष्टमाध्यन्दिनसवना तृतीयसवनोक्रमः, रूजिष-अभिषव-आर्भव-पवमानादि-अग्निमरुत्-शस्त्रम् |
| दशमं दिनम् रविवासरः | प्रातः ६.०० वादनात् रात्रौ १०.०० वादनपर्यन्तम् | उखस्तोत्रशस्त्रम् (पर्यायत्रयम्), षोडशीस्तोत्रसत्रम्, द्वादशी-अतिरात्र-स्तोत्र-शस्त्राणि, अस्विन-सहस्र-स्तोत्र-शस्त्रम्,चत्वारि अप्तोर्यामस्तोत्रशस्त्रम्, अनुयाज्यादि-हरियोजना(द्रोणकलशं शिरसि संस्थाप्य), अभिषेक-पत्नी-संयाजा-प्रायश्चित्तानि, पूर्णाहूतिः |
| एकादशं दिनम् सोमवासरः | प्रातः ७.०० वादनात् अपराह्णे ३.०० वादनपर्यन्तम् | उदायण-इष्टिः, मैत्रावरुण-आमिक्षा, देविकायागः, उद्वासनीया, अवभृतम्, **प्रातः ९.०० महावभृतस्नानम्** श्रीश्रीस्वामिनः तुलाभारवैभवं सविशेषं भविष्यति |
| द्वादशं दिनम् मङ्गलवासरः | प्रातः ७.०० वादनात् अपराह्णे ३.०० वादनपर्यन्तम् | **सौत्रामणि-यागः** ऋत्विक्सम्भावना, महाशीर्वादः, फलमन्त्राक्षताप्रसादः,शुभम् |

प्रतिदिनं चतुर्वेदपारायणम्, सर्वमूलपारायणम्, भागवतसप्ताहः, श्रीमन्न्यायसुधापारायणम्, तथा प्रतिदिनं सायं प्रसिद्धैः उपन्यासकैः क्रियमाणः उपन्यासः , नामसङ्कीर्तनं स्वस्तिमङ्गलारतिः प्रसादविनियोगः च भविष्यति

S Modern Printers, Karur. Cell : 9443494355